# Shri Shivakamasundaryamba Dandaka 08-14

# શ્રીશિવકામસુન્દર્યમ્બાદણ્ડકઃ

## Document Information

Text title : Shri Shivakamasundaryamba Dandaka 08 14

File name : shivakAmasundaryambAdaNDakaH.itx

Category : devii, devI, daNDaka

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 08-14

Latest update : August 15, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 15, 2021

*sanskritdocuments.org*

# શ્રીશિવકામસુન્દર્યમ્બાદણ્ડકઃ

જય જય શિવકામસુન્દર્યુમે, દેવિ, રમ્યાકૃતે,
ભક્તરાજીહૃદન્તઃસ્થિતાજ્ઞાન-
ગાઢાન્ધકારપ્રભેદસ્ફુરદ્બાલસૂર્યાયમાણૈર્નખૈઃ ભૂષિતે પાદકાન્ત્યા
નિરસ્તારુણાભામ્બુજે, જઙ્ઘયાધઃકૃતાનઙ્ગતૂણીયુગે,
કન્તુજિન્મોહદોરૂદ્વયીશોભિતે, દિવ્યકૌસુમ્ભપટ્ટામ્બરાલઙ્કૃતે,
નૈકરત્નચ્છદાભાસુરોદ્દામકાઞ્ચીલતામણ્ડિતે,
નીલરોમાવલીમેયમધ્યાનતે, કોકયુગ્મોલ્લસદ્વક્ષજાતોન્નતે,
તારહારાવલીરાજિતાભ્યન્તરે,
પાર્વિકસ્વચ્છશીતાંશુબિમ્બસ્ફુરદ્વક્ત્રશોભાસરોમજ્જદીશાનહૃજ્જાત-
સદ્બુદ્બુદૌપમ્યવન્નાસિકામૌક્તિકોદ્ભાસિતે,
નીલકઞ્જાતસૌન્દર્યજિલ્લોચનોદ્યત્કટાક્ષાવલીરક્ષિતાશેષલોકે,
મહારત્નરાજીલસચ્ચારુકોટીરભારાજિતે, મઞ્જુલે,
કામજિત્સ્વાન્તસમ્મોહકાન્યઙ્ગકાન્યમ્બકો વા ભૃશં વર્ણિતું
શક્નુયાદ્વેદવાચાં સુદૂરાણિ દિવ્યાનિ તે સચ્ચરિત્રાણિ કો વેદ ભૂમ્યામુમે ॥ ૧॥

ભગવતિ,
નિજપાદસેવાસમાયાતસપ્તાર્ણવીસન્નિભોદારગમ્ભીરતાવન્મહાશૈવ-
ગઙ્ગાખ્યતીર્થોત્તમપ્રાન્તસંરૂઢચામ્પેય-
ગન્ધાભિરામાતિબાલાનિલાધૂતચીનાંશુકોન્નદ્ધકેતુસ્ફુરદ્ગોપુરાલઙ્કૃતે,
તારમઙ્ગાપુરે તારકાનાયકે
દક્ષકોપાભિભૂતે પુરા કૃત્તિકારોહિણીપૂર્વતત્પ્રેયસીભિઃ
સ્વમાઙ્ગલ્યસિદ્ધ્યૈ સદા સેવિતે, બ્રહ્મણા વહ્નિના ધર્મરાજેન
રક્ષોજલાધીશવાતૈસ્તથા રાજરાજાદિસર્વામરાધીશ્વરૈર્નિત્યમારાધિતે,
વેદવાગ્બોધિતે, ચારુકૈલાસનાથે હરે બદ્ધભાવે શિવે ॥ ૨॥

અમૃતજલધિમધ્યભાગોલ્લસદ્રત્નવર્યોજ્જ્વલદ્વીપદેશે
મિલત્કલ્પવાટીવૃતે ચારુચિન્તામણીગેહમધ્યે

મહાચક્રરાજસ્ફુરત્પીઠિકાયાં સુરશ્રેષ્ઠમુખ્યામરાધીશપાદે,
સદા શમ્ભુમઞ્ચે મહેશાનકામેશ્વરસ્યાઙ્કમધ્યસ્થિતે, દેવિ,
કામેશ્વરીપૂર્વસર્વામરીયૂથનાથાભિરારાદુદારાભિરામાભિધાનાભિરારા-ધિતે,
અત્યન્તહૃદ્યં તમુદ્યન્તમાનન્દરૂપં સદા શમ્ભુમમ્બ ત્વયા સાકમેવં
હૃદા યે ભજન્તે મુદા તે હિ લોકેશ્વરાઃ ॥ ૩॥

ગિરિવરતનયે સદા સમ્પદં પુત્રપૌત્રાભિવૃદ્ધિં ચ દેહીતિ
યાચ્યાક્રમઃ સ્વર્ગમોક્ષપ્રદાયાં ત્વયિ સ્વલ્પકસ્તન્મયા યત્સ્તુતૌ
યચ્ચ પૂજાવિધૌ ધ્યાનયોગે નમસ્યાસુ યચ્ચાપરાદ્ધં શિવે ક્ષમ્યતાં
સર્વમેતત્વયા સર્વલોકેશ્વરિ ત્વં સદા પાહિ માં તુભ્યમસ્તુ
પ્રણામાઞ્જલીનાં શતમ્ ॥ ૪॥

ઇતિ શ્રીશિવકામસુન્દર્યમ્બાદણ્ડકઃ સમાપ્તઃ ।

Proofread by Rajesh Thyagarajan

*Shri Shivakamasundaryamba Dandaka 08-14*

pdf was typeset on August 15, 2021

Please send corrections to *sanskrit@cheerful.com*